The Gurukula Sanskrit Series. ( No. II ).

ओ३म्

गुरुकुलग्रन्थावलिः ।

द्वितीयो ग्रन्थः ।

# संस्कृताङ्कुरः ।



गुरुकुलमुख्याधिष्ठातृ-श्रीमुन्शीराममहोदयनिदेशेन
अर्गलपुरनिवासिश्रीपं० भीमसेनशर्म्मणा
सङ्कलितः ।

...सिंहशर्म्मणा संशोधितः ।



स च
पं० अनन्तरामप्रबन्धेन
जालन्धरपत्तने
सद्धर्मप्रचारकयन्त्रालये
मुद्रितः ।

सम्वत् १९६२

प्रथमावृत्तौ १००० पुस्तकानि

मूल्यम् =)

राजेश्वर्य्याजनो विश्रुः विचरणामभूदन्तकालोस्त्वनन्तः
कृत्वायुः पुण्यदाच्चैगरणौयशङ्करी कृत्यवशैर्नवत्या
काव्यादर्शमऽस्ति एडवरडवय इहाधिकामीहेददातु
वेरैर्नोवेल्ल भेतोऽऽ सकलजनबलोराज्यधर्मौयतस्तं:

॥ ओ३म् ॥

# संस्कृताङ्कुरः

## प्रथमः पाठः ।

ईश्वरः सर्वैरुपास्यः । विचित्रमेतज्जगत् तेनैव रचितम् । स चास्माकं पितृवत् पालकः । अस्माभिः परस्परं भ्रातृभावेन वर्तितव्यम् । निरर्थको रागो द्वेषश्च न विधेयः । विद्याभ्यासेऽवश्यं यत्नो विधातव्यः । गुरूणामाज्ञा पालनीया । ईश्वरप्राप्त्यैव कृत्स्नसुखानि लभ्यन्ते । यशोधनवत् । तद्यथा :—

कश्चिद्यशोधनो नाम नृपतिः "असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभुजः" इति स्मरन् स्वप्रतापं प्रचिख्यापयिषुः, कृतहोमादिविविधसत्क्रियः, सुरचितनिजस्थानप्रान्तदुर्गः, उद्धृतपृष्ठशत्रुः, नानाविधबलयुतः, सर्वदिग्विजिगीषया पूर्वं प्राचीं दिशं प्रस्थितः । पथि गच्छंश्च बृहतीं सेनां सञ्चालयन् सर्वेषां दुष्प्रधर्षो बभूव । अकरोच्च स्यन्दनोद्धूतै रजोभिर्व्योम भुवस्तलमिव, वर्णक्रियापरिमाणतो मेघतुल्यैर्गजैश्च भूतलं व्योमेव । विदधे च, निर्जलस्थानानि समुद्भूतजलानि, नाव्या नदीश्च सुप्रतराः, काननानि सुगम्यानि, शक्त्युत्कर्षात् स्वाभीष्टसम्पत्त्यै परोपकृत्यै च ।

स चानेकान् जनपदानाक्रामन् बहून् राज्ञो जित्वा पूर्वां दिशं स्वाधीनीकुर्वन् महोदधेरुपकण्ठं प्राप।जितेषु देशेषु स्वनामाङ्कितान् विजयस्तम्भानारोपयामास। द्विषदविसह्यविक्रमाद् गृहीतप्रतिभुस्कारैर्विजिगीषोस्तस्मादापादपद्मप्रणतै राजभिर्वैतसीं वृत्तिमाश्रित्यात्मा संरक्षितो, ददुश्च ते सञ्चितानि स्वयशांसीव स्वस्वपुरोद्भवोत्कृष्टवस्तून्युपायनरूपेण।एवं दाक्षिणात्यान्पाश्चात्यानुदीच्याँश्च विजित्य तत्र तत्र जयस्तम्भं व्यधत्त। बहवस्तु भूपतयस्तद्वीर्यं सोढुमसमर्था ग्रीष्मर्तौ सूर्यातपमिव अपनीतशीर्षण्याः सन्तोऽयुद्ध्वैव तं शरणं ययुः। सच प्राभृतावाप्तधनैर्बहून् यज्ञांश्चकार। न किंचिदपि परकीयं धनमात्मार्थे विनियोजितवानिति यशोधननाम्नोऽन्वर्थतां लेभे। स्वदेशं प्रस्थातुकामश्च निजमहिषीद्वयाय* पृथक् पृथक् पत्रं प्रहितवान्। लिखितमासीच्च तस्मिन्नित्थं यत् स्वाभिमतवस्तूत्तरपत्रे लेख्यं,तदेव तुभ्यमानेष्यामीति।तदुत्तरे चैकया "मह्यं काश्मीरोद्भवं बहुमूल्यलभ्यं दुकूलमानीयागन्तव्यम्" इत्यलेखि। द्वितीया तु विचारपरिपक्वमतिरेवमलेखीत्, "श्रीमद्भिरेव तूर्णं मदीयं स्थानमलङ्करणीयं नान्यत् किंचिद्वाञ्छामीति"। विदिताशयश्च राजा तस्यै दुकूलमात्रं प्राहिणोत्, द्वितीयस्यै च तत्प्रेमवशाङ्गतः स-

---

*दृष्टान्तमात्रमेतत्, दृष्टान्ता नैवेतिहासस्य सत्यतां सूचयन्तीति।

वाणिग्वेष तत्तद्देशजानि वस्तून्युपादाय तद्गृहं प्राविशत् ॥

एवमेवेश्वरभक्तोऽपीश्वरप्राप्त्या सर्वसुखान्यधिगच्छति ॥

## द्वितीयः पाठः ॥

सत्यमेव सर्वदा वक्तव्यम्। सत्यादेव सृष्टेः सर्वोऽपि व्यवहारो यथार्थं प्रचलति। तत एव प्रजायां राज्ये च सुखं जायते। तेनैव नरः सर्वत्र विश्वस्तो भवति। विश्वासात् खलु प्रतिष्ठां लभते। ततः सुखं शान्तिश्च समुत्पद्यते। सत्यात्परः कोऽपि धर्मो नास्ति। तस्मात् सत्यं न लोपनीयम्। सत्यवादी जयति। अनृतभाषी सर्वत्र तिरस्कारमाप्नोति। यत्र असत्यस्य वृद्धिस्तत्र क्लेशोऽनुभूयते। अतः सर्वाश्रमिभिः सुखवर्द्धनाय सत्यानुष्ठानं कार्यम्। सत्यं वाचो भूषणम्। तस्मात् सत्यं परमं वदन्ति। न तत्सत्यं यच्छलेनाऽभ्युपेतम् ॥

कश्चित्सत्यव्रतो नाम द्विजः पुरा प्रतिवसति स्म। स च मनसा वाचा कर्मणा सत्यमेवानुतिष्ठन् सर्वेषां विस्रम्भभूमिरजायत। दानसत्सङ्गादयोऽपि गुणास्तस्य कृतसौहृदा इवासन्। अभ्यस्तविद्यस्य मुनिवृत्ते स्तस्य प्रत्यहमीश्वराज्ञां पालयितुर्यौवन-

कालोऽतिसुखेन व्यतीयाय। एकदा ग्रामान्तरे वेद-व्याख्यानं श्रोतुं गतस्य तस्याध्वनि दस्युर्धनुष्मान् मिलितः, तेनाभिहितश्च:-

ब्राह्मण! अद्य कञ्चिदपि पुरुषान्तरमनासादितवतो मम त्वमेव दैववशाल्लब्धोऽसि। इदानीमभीष्टदेवतां स्मर, यतस्ते महायात्राकालः समागतोऽहं च तव धनादिना साकं प्राणानप्यपजिहीर्षामि।

ब्राह्मणेनोक्तं—प्राणैस्तव न कोप्युपकारोऽतो यत्किञ्चिदत्यल्पं द्रविणं तदेवापहर्तव्यम्। ततो दस्युतरो नाहं केवलं धनादिकमपहरामि, किन्तु वेदमार्गमननुतिष्ठन् प्राणैः सहैव तत्सर्वं सर्वस्यैवापहरामीति प्रतिज्ञाभङ्गं न कर्तुं शक्नोमीत्यगादीत्।

सच खिन्नमनाः पुनरवोचत्:-वीर! दस्यो! यद्येवं तर्ह्यहं वैदिकव्याख्यानं श्रुत्वा यामान्ते त्वदन्तिके आगच्छामि,तदा त्वया मत्प्राणैः सह सर्वमपहरणीयम्, एवं च त्वदीयप्रतिज्ञाविघातोऽपि न स्यादहं चाद्यतनं दिवसं सफलतां नेष्यामि; अन्यथाऽयं मदीयो दिवसोव्यर्थ एव स्यात्। उक्तं च महात्मभिः:-

"धर्मानुष्ठानहीनानि दिनान्यायान्ति यस्य वै।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति" ॥

अतस्त्वमेकं प्रहरमनुग्रहं कुरु, स्थित्वाऽत्र प्र-

तीक्षस्व मां, येन मदीयमपि कार्यं न विलुम्पेदि-
त्युक्त्वा विरराम ।

सच नीचतरः परुषाक्षरां वाचमवलम्ब्य भर्त्स-
यन्निवाभणत्-मूर्ख द्विज ! कथमहं विश्वसिमि ! प-
रिवृत्य तवागमनं भवेन्नवेति ? ।

प्रकम्पितगात्रेण ब्राह्मणेनोक्तम् :-

सत्यसन्ध ! यथा तव प्राणनिर्मोक्षणे दृढप्रतिज्ञ-
त्वं तथा ममापि सत्यवचने सत्यकर्मणि च निश्चलवृ-
त्तित्वं; यथा त्वं परस्वाहरणेन सन्तुष्यसि तथाऽहम-
पि निजसत्यादिकमाचरन् बह्वानन्दमनुभवामि । पु-
त्रकलत्रादितोऽपि मम सत्यभाषणादिकं प्रियमस्ति,
स्वात्मविरुद्धं कार्यमाचरन्तं पापपङ्कनिमग्नं कदा-
पि मां न करोतु भगवान् । ते त्वन्य एव धूर्ता ये
निजात्मानं वञ्चयित्वा कार्यं साधयन्ति । ततो
द्विजान् जिघांसो ! मयि विश्वासं कर्तुमर्हसि, वस्त्रा-
दिकं च तुभ्यमिदानीमेव विश्राणयामि। नहि मम
साधारणजनवद् भौतिकेषु पिण्डेष्वास्थाऽतः समु-
चितमाचर ।

तदीयवचनसुधां निपीय कथंचिज्जातदयोदय स्त-
मेककं मुमोच । पुनः स ब्राह्मणस्तत्र गत्वाऽवहितचेत-
सा वेदव्याख्यानं निशम्यात्यन्तं सन्तोषमगमत् । ते-

नैव पयाऽऽगत्य च स्वासून्मोचयितुमनास्तस्मै स्वश-रीरं पललपिण्डमिवोपानयत् । एतदवलोक्य दस्युल-रो हि तदीयासामान्यनिश्चयेन क्षणं विस्मित इवाव-तस्थे । अहो ! एतादृशा अपि स्थिरमतयो धर्मात्मानः सन्ति ये स्वासून् परित्यज्यापि स्वधर्मं न त्यक्तुमुद्यताः । एके च मादृशा ये जीवान् निहत्य स्वोदरदरीं पूरयन्ति, इत्यादि विचारयन् तमुवाच–विप्र ! तव सत्यवच-नादहं भृशन्तुष्टोऽस्मि, नहि त्वां मारयितुं कथंचिद-प्युत्सहे, वाञ्छामि च मामधर्मं त्वमुपदिश, येनाह-मीश्वरं प्रसाद्य मोक्षं लभेयेति । स चोत्थाय त-माचचक्षे- मित्र ! नाहं बहुश्रुतोऽस्म्यतस्त्वां प्रति मोक्षमार्गमुपदेष्टुमसमर्थस्तथापि यत् किञ्चिच्छ्रुतं त-त्संक्षिप्य कथयामि:---

सत्यं ब्रूयात् प्रियं ब्रूयान् न ब्रूयात् सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥
"नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम्" ।
"परोपकारः पुण्याय पापाय परपीडनम्" ॥

इत्यादिकमुपदिशन्तं ब्राह्मणं बहु मानयन् स जी-वहिंसातो निवृत्तः साधुवृत्तश्च संवृत्तः ॥

एवमेव ये सत्यव्रतं पालयन्ति ते लोके विलक्षणप्र-भावा जायन्ते ।

## तृतीयः पाठः ।

——:o:——

कामक्रोधौ लोभमोहौ सर्वदा परिवर्जयेत् । मोह एतेषां कारणम् । येन मुह्यन्ति स मोहः । एतज्जयेन त्रिविधदुःखात्यन्तनिवृत्तिर्जायते । तामेव मुक्तिं परमपुरुषार्थं वाऽऽचक्षते । एष्वन्यतममपि निषेवमाणस्य कृत्याकृत्यविवेको न सम्भवति । क्रोधाग्निना स्वं परं च तापयति; किं बहुना स्वपितरावपि क्रोधाऽभिभूतस्ताडयति । बहूनि पापानि लोभादेवोत्पद्यन्ते । मदमानमात्सर्यादयो ऽप्येषां सहचराः । तेषां जयेऽपि यत्नमातिष्ठेत् । अन्यथा विघ्नसम्भावनया सम्यक् कार्यसिद्धिर्न स्यात् । यमनियमादिपरिचर्या तज्जयोपायः । एतान् जित्वैव सदाचारी ब्रह्मचारी भवितुमर्हति । अहङ्कारादीन्यपि विद्याविरोधीनि विहातव्यानि ॥

एकदा कश्चिद् विद्यासागरनामा धनमदमोहितो मातापित्रादिभिस्तदीयदुरभिमानं सोढुमशक्नुवद्भिः स्वगृहान्निःसारितः । स च विषण्णचेताः स्वगेहात्किञ्चिद्द्रविणमुपादाय देशान्तरं प्रस्थितः । सायं कञ्चिद् ग्राममाससाद; तत्र चैकस्य गृहिणो वेश्मनि रात्रावुपविवेश, गृही चागत्य तं पथिकमुवाच:—

"भद्र ! क्व गन्तासि, कुतश्चागतोऽसि ?। दुर्बुद्धिः स विद्यासागरः "अयं द्रविणेच्छयैव मां विनयेन पृच्छती"ति मत्वा किं तवानेन व्यापारेण महीसुरादागतो विद्यासागरनामाऽहमस्मीत्यादीनि वाक्यानि साभिमानं व्याजहार। ततः स धार्मिको गृही तदभिमानं प्रमाष्टुकामः पुनरवदत्:-यदि त्वं विद्यासागरोऽसि तर्हि वद ! कियत्यो विद्यास्त्वया पठिता इति; स तु नायं तादृश इत्यादि विभाव्याचष्टेस्म। महात्मन् ! विद्यास्तु मया नाधीता केवलं द्रविणसम्पन्नोऽस्मि, जानामि च "सर्वे गुणाः काञ्चनमाश्रयन्ति"; मम पितृभ्यान्तु वस्तुतत्त्वमजानद्भ्यामनधीतविद्योऽहं गृहाद् बहिष्कृतोऽतःक्वचिद् देशान्तरे वाणिज्यं कुर्वाणेन कालः क्षेपणीय इत्येवावधारयामि, सर्वे च धनपरायत्ता इति व्यक्तमेव।

(ब्राह्मणः) धिङ् मूर्ख ! द्विजपुत्रोऽपि त्वं धनमेव बहु मन्यसे ! नैतदुचितं, यतः-

"निर्धनाः सुखिनो दृष्टाः,
सधनाश्चातिदुःखिताः।
सुखदुःखोदये जन्तो-,
र्दैवाधीने धनेन किम्" ॥

अथ च बुद्धिविहीनानां धनमपि विनश्यति, बुद्धियुक्ताश्च पुनरपि धनं सञ्चेतुं शक्ताः; बुद्धिश्च वि-

श्रया विना नायाति, अतस्त्वं पूर्वमहङ्कारं विहाय विद्यार्जने यतस्व। वर्तते चेतःपूर्वस्मिन् देशे विजयकेतु नाम नगरं, तत्र विद्याधरशर्म्मा पण्डितस्तवाभिमानमपाकरिष्यति, विद्योपदेशं च विधास्यतीत्युपदिश्य धार्मिको गृही निवृत्तः। स च तदीयं निरपेक्षं वचनमुपाकर्ण्योदितलज्ज स्तन्निकटे चलितः। तत्र गत्वा तं सूरिं प्रणम्योवाच :-

भगवन्! पिपठिषया भवच्चरणावुपाश्रितोऽस्मीति।

विपश्चित्-तिष्ठ तावत्, पाठपूर्त्यनन्तरं त्वदीयवार्तां श्रोष्यामि, मध्ये वार्ताकरणमसभ्यताया लक्षणम्। पुनः स आचार्यस्य मुखान्निःसृतामत्यन्तमधुरां वाणीमुपश्रुत्य विस्मित इव लोकैर्लक्षितः। पाठपरिसमाप्तावुक्तश्च देशिकेन-

किं भोः किं प्रचर्चितम्, किंचाध्येतुमिच्छसि?।

स बभाषे-महात्मन्! नाहं किमपि पूर्वमपाठिषम्, इदानीमेवाभिलाषा समुत्पन्ना। तस्याः सफलीकरणं त्वदायत्तम्।

आचार्यः--यद्येवं तर्हि मासद्वयं शुश्रूषणादिप्रकारं परीक्षिष्ये, ततस्तवाध्ययनं प्रारप्स्ये।

विद्यासागरो दुरभिमानी-देव ! भवदीयं कार्यं मदीयोऽयं कर्मकरः सम्पादयिष्यति, अतः श्वोदिनादारभ्यैवाहं पाठनीयः ।

आचार्यः—दुर्विनीत ! न केवलं परिवस्यादि कार्यं द्रक्ष्यामि, किन्तु त्वमधिकार्यसि नवेति विचार्य पाठयिष्यामि । यदि तव भृत्यो मदीयं कार्यं साधयेत्, तर्हि मदीयोऽप्ययं छात्रस्त्वदीयं कार्यं साधयेन्नाहं त्वादृशमभिमानिनमध्यापयितुमिच्छामि ।

इति श्रुत्वा स विद्यासागरो जातव्रीडस्तदुक्तिप्रत्युक्तितोषितश्चाभिमानमपहाय तच्छुश्रूषको बभूव ॥

उदाहरणमात्रमेतत् । नहि शुभफला स्वच्छतरा विद्या कामादिव्यसनाभिभूतैरवाप्यते ॥

---

## चतुर्थः पाठः ।

---

स्नात्वा सन्ध्योपासनमनुष्ठेयम् । तेन शरीरे आत्मनि च बलमायाति । वेदमन्त्रार्थविचारः प्राणायामश्च तत्र मुख्यं कार्यम् । आचमनाद् व्यायामाद्युत्था उष्णता निवर्तते । इन्द्रियस्पर्शे-इन्द्रियाणि स्वाचारव-

न्ति तिष्ठन्त्वित्यभिप्रायः। तत्स्थानि खानि सर्वाधिकरणं शरीरं चालस्यादि विहाय सुस्थं भवत्विति मार्जनम्। मन्दाग्निसन्धुक्षणगदनिवृत्तिधातुसाम्यादि प्राणायामप्रयोजनम्। भाविपापापनोदनाय अघमर्षणमन्त्रार्थविचारः। षट्सु दिक्षु द्वेषादिरहितं मनः स्यादित्येतत्तात्पर्यकाः परिक्रमामन्त्राः। ईशस्वरूपबोधका स्तत्प्रार्थनादिविषयकाश्चाग्रिमा मन्त्राः। मानसिकबलवर्द्धनाय जपोऽर्थात् पुनःपुनस्तदर्थभावनम्। पुनर्नमस्कृतिपूर्वकं समर्पणम्। ततो होमो बलिवैश्वदेवश्च विधेयौ। व्यायामोऽपि नैत्यिकं कर्म।

"लाघवं कर्मसामर्थ्यं विभक्तघनगात्रता।
दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते॥"

कश्चिदेको गृहस्थः केनचिद्धेतुना गदार्तोऽभवत्। बहुभिरगदङ्कारैस्तत्र चिकित्सा कृतापि निष्फलतामेता। शनैः शनैश्च वृद्धिमुपेत स्तदीयो रोगो राजयक्ष्मरूपेण परिणतस्तदानीं तस्य सम्बन्धिनः सर्वेऽपि नैराश्यं गतास्तथापि ते प्रयतमाना एवासत। कदाचित्तैनैव पथा शास्त्रपारदृश्वा लब्धयोगनैपुण्यो विशेषतः प्राणनिरोधक्रियाकुशलो मुनिवरः समाययौ। तान् शोकपरीतान् दृष्ट्वा दयापरतन्त्रो बभाण चः—

युष्माभिः किमर्थमेकीभूय शोच्यते इति। त ऊचुः

किंवदामो महात्मन्! अमुकोऽयमस्माकं सम्बन्धी दानदयादाक्षिण्यनिरतोऽपि नाद्यावधि जातसुखो-दयो दृश्यते। दैवेन चाचिन्त्यशक्तिनाऽस्माभिर्विहिताः सर्वं एव यत्ना वैफल्यमवापिताः, अधुना च वयं किंक-र्तव्यविमूढाः संजाताः, केवलं वरेण्यं भगवन्तमेव शरण्यं मन्यमाना आस्महे इति।

स करुणासिन्धुस्तपस्वी प्रोवाच-यूयमिदानीं का-न्दिशीकत्वं त्यजत। एतदीयरोगस्य प्रतीकारोपायमह-मादिशामि, यद्यैश्वरी कृपाऽऽयुःशेषता वा, तर्ह्यवश्यमयं नीरोगो जायेत। शृणुत! अयं स्वच्छवायुजलादिप्रदेशे संरक्षणीयः, प्रत्यहमस्य सविधे होमश्च कारयितव्यः, सन्ध्ययोर्द्वयोश्चायं नियतं प्राणायामान् यथाशक्ति कु-र्यात्, प्राणायामैरस्य दोषा विनश्येयुः (प्राणायामैर्दहे-द्दोषानिति, मनुः)। सत्यां स्वस्थतायां व्यायामादिकं चैतेनानुष्ठातव्यमेवं च युष्माकं शोकशङ्कोः समूलो-न्मूलनं भविष्यति।

ते तद्रोगनिवृत्त्यै स्पृहयालव स्तस्मिन् श्रद्धालवो-ऽतन्द्रालवस्तथैव चक्रुः, षण्मासानन्तरं तं व्यपगतखेदं पुष्टाङ्गं दृष्ट्वा जहृषुः॥

एवं यो हि प्राणायामं व्यायामं च नित्यमभ्य-स्यति सोऽवश्यं रुजा पिशाच्याऽपरिभूतो भवति॥

## पञ्चमः पाठः ।

स्वाध्यायेऽप्रमत्तेन भवितव्यम् । विद्यया विहीनः पशुरस्ति । बहवः संशया विद्ययैवोच्छिद्यन्ते । लोके तया समं धनं नास्ति । पठनस्य पञ्च फलानि—शीलं, परहितं, गर्वाभावो, धृतिः, क्षमा चेति । येनामृतत्वं भजते स एव विद्याशब्दार्थः । सा द्विविधा, परा अपरा च । व्यावहारिकी अपरा, मोक्षविषयिणी परा ॥

न चोरहार्यं न च राजहार्यं,
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्द्धत एव नित्यं,
विद्याधनं सर्वधनप्रधानम् ॥
कृष्णं वपुर्वहतु चुम्बतु सत्फलानि,
रम्येषु संवसतु चाम्रवनान्तरेषु ।
पुंस्कोकिलस्य चरितानि करोतु कामं,
काकः कलध्वनिविधौ सतु काक एव ॥

श्रद्धया सम्मेव सा कार्यकारिणी भवति । वेदविद्यापाठिन एव ब्रह्मचारिणः कथ्यन्ते । यस्य साऽधिकला स एव सुप्रतिष्ठो मान्यश्च ।

"एकाऽपि विद्या गुणवत्तराणां,
या चित्तमारोहति सैव धन्या" ॥

"अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत्"।

विद्याधनशून्यो लोकैरुपहस्यतेऽवज्ञायते च। शिल्पयन्त्र-वार्तावह-लोहतन्त्र-वाष्पीययान-व्योमयानादिकर्माणि विद्यासम्पन्नैरेव कृतानि किं बहुना-

"जीवत्यर्थदरिद्रोऽपि धीदरिद्रो न जीवति"।

धीश्चात्र विद्यासंस्कृतैव ग्राह्या। तया विना तस्याः प्रायोऽनुपयोगात्॥

---

## षष्ठः पाठः।

चतुर्विधो धर्मः सेवनीयः। एकः श्रुत्युक्तः। द्वितीयस्तदनुकूलस्मृत्युक्तः। तृतीयः सतामाचाररूपः। आत्मप्रियत्वेनाभिमतश्चतुर्थः। यं क्रियमाणं सभ्याः प्रशंसन्ति स एव धर्मः। धर्मरक्षणात् सांसारिकसुखं मोक्षश्चोत्पद्यते। पूर्वजा दुःखान्यनुभूयाऽपि शरीरादेरधिकं प्रियं धर्मं मेनिरे। परलोके स एव सहायको भवति। तस्याचरणेन निकृष्टवर्णोऽप्युत्कृष्टवर्णः संपद्यते। ब्रह्मक्षत्रियविट्शूद्राश्चत्वारो वर्णाः सन्ति। धृत्यादिलक्षणो धर्मो मनुना वर्णितः। स च सर्वेषां समानः। शरीरात्मबलवर्द्धनं ब्रह्मचारिणां मुख्यो धर्मः।

धर्मशास्त्रेषु बहुभिः प्रकारैर्धर्मोपदेशः कृतः। अहिंसाद्यनुष्ठानपूर्वकं योगेनात्मदर्शनं हि परमो धर्मः ॥

कस्मिंश्चिद्देशे वैदिककर्मठो नाम्ना सुभद्रो विप्रवरः प्रतिवसति स्म। तस्य च पतिवत्सला शशाङ्कलेखानाम्नी धर्मपत्नी आसीत्। तयोश्च पतिपत्न्योः प्रेमाश्रयः शौर्यौदार्यादिनानाविधगुणशाली विजयकेतुर्नाम पुत्रस्तावानन्दयामास। स च गुरुकुलदीक्षितस्तत्सूनुः समावर्तनानन्तरं कृतोद्वाहोऽपि ब्राह्मणवृत्तिं शिलोञ्छादिरूपा मेवावलम्बमानः "सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेदि"—त्यादिशास्त्रेषु जातविस्रम्भः समजायत। एवं तैश्चतुर्भिरपि धर्ममर्यादामनतिक्रामद्भिः संसृतिदोषापनोदनाय कृच्छ्राणि सहित्वाऽपि प्रयत्नातिशयमादधानैः सुखेन कालो नीयते स्म। दुर्वारविधिनियोगात् प्रावृट्काले स विजयकेतुरहिना दष्टो ममार। तस्यौर्द्ध्वदैहिकक्रियां निर्वर्त्य ताभ्यां सहितः सुभद्रो पुनस्तथैव ध्यानादिपरायणस्तस्थौ। तदीयसम्बन्धिनश्च विलापार्तास्तमुपगम्य प्रोचुः—

भद्र! सुभद्र! कथमस्मिन्नपि विषमे समये निःशोकस्तिष्ठसि!, किं त्वां शोको न बाधते?। सोऽवदत्,-किं मित्र! मदीयशोकेन स पुनः परावर्तिष्यते?।

"एकः प्रजायते जन्तु-,
रेक एव विलीयते ।
एकोऽनुभुङ्क्ते सुकृत-,
मेक एव च दुष्कृतम्" । (मनुः)

भूयस्ते तन्मातुरन्तिके गत्वाऽवदन् – पतिव्रते ! त्वं तं किं न शोचसि !, सोवाच—

"न मे पुत्रः पूर्वमासी-,
न्न मे पश्चाद्भविष्यति ।
धर्माधर्मेण जायन्ते,
दुःखानि च सुखानि च" ॥

पुनस्ते तस्य धर्मपत्न्या निकटेऽभिगम्येदमूचु :- देवि ! सत्यशीले ! किं त्वद्हृदयमपि शोकपिशाचो न बाधते ?। साऽब्रोचत् :-

"न कस्य कुर्वन्ति शमोपदेशं,
स्वप्नोपमानि प्रियसंगतानि ।
जरानिपीतानि च यौवनानि,
कृतान्तदष्टानि च जीवितानि" ॥

"नामुत्र हि सहायार्थं,
पिता माता च तिष्ठतः ।
न पुत्रदारा न ज्ञाति-,
र्धर्मस्तिष्ठति केवलः" ॥

"अशोच्या मांसपिण्डास्तु,
शोच्यन्ते नहि सूरिभिः" ॥

एवं बहूनुपदेशान् श्रुत्वा तेऽपि विगतशोका बभूवुः ॥

सत्यम्, स्वधर्मनिरतस्य विपत्तावधैर्यं सम्पत्तावजना च नैव जायते ॥

—:※:—

## सप्तमः पाठः ॥

—✲✲✲—

भोजनात् पूर्वं माचामेत्,
गण्डूषन्तु ततः परम् ।
नित्यं कर्म तथा कुर्याद्,
ब्रह्मचारी दिने दिने ॥ १ ॥

दिवास्वापो निषिद्धोऽस्ति,
आचार्याद् वेदमर्जयेत् ।
एकवेदसमाप्तिं तु,
सिद्ध्यात् सूर्यवर्षतः ॥ २ ॥

ब्रह्मचर्यव्रतं चैव,
लोपयेन्न कदाचन ।

आचार्याधीनतां गच्छेद्,
अधर्माचरणादृते ॥ ३ ॥

असत्यवदनं क्रोधं,
योषया भाषणादिकम् ।
शय्यायां शयनं चैव,
ब्रह्मचारी विवर्जयेत् ॥ ४ ॥

नर्तनं गानवादित्रं,
गन्धासक्तिं तथाऽञ्जनम् ।
स्नानभोजननिद्रादे-,
राधिक्यं निन्दया सह ॥ ५ ॥
लोभमोहौ भयशुचौ,
सदा वर्णी परित्यजेत् ।
प्रातःकाले समुत्थाया-,
ऽऽवश्यकं कर्म चाचरेत् ॥ ६ ॥
व्यायामस्नानसन्ध्याश्च,
विदधीत निरालसः ।
मुण्डोऽथो जटिलो वा स्यात्,
रूक्षाहारं सुरादिकम् ॥ ७ ॥
आमिषं च न सेवेत,
गवाद्वैर्वाहनं सदा ।
ग्रामान्तरे निवसति-,
मुपानच्छत्रधारणम् ॥ ८ ॥

अर्थमिन्द्रियसंस्पर्शं,
हित्वा, वीर्यं * सुरक्षयेत् ॥
तैलाभ्यङ्गविमर्दनं न विहितं,
चात्यम्लतिक्तादिकम् ।
क्षारं रेचनकारकं च यदिह,
तत्सेवनं नोचितम् ।
युक्ताहारविहारवान् खलु भवेत्,
विद्यार्जने यत्नवान् ।
सौशील्यं मितभाषितां च विधरेत्,
पूर्वाश्रमी सभ्यताम् ॥ ९ ॥

मनःशुद्धिं देहशुद्धिं,
वस्त्रादिपरिशोधनम् ।
विदध्यान् मेखलां दण्डं,
धारयेद् विधिपूर्वकम् ॥ १० ॥

सायं प्रातर्गुरोः पादा-,
वभिवाद्यौ हिते रतैः ।
विजित्य चेन्द्रियग्रामं,
वर्णिभिर्होमपूर्वकम् ॥ ११ ॥

---

* यथा विलिप्ते तु रसैः प्रकाशते, काचस्य पृष्ठे प्रतिरूपसञ्चयः । हृल्लग्नशुक्रे तु तथोर्ध्वरेतसामादर्शवत् सर्वविभुः प्रकाशते ॥

( परमहंसरामकृष्णः )

## अष्टमः पाठः ।

—:x*x:—

देहवस्त्रमनःशुद्धौ प्रयत्यतामित्युक्तम् । देहवस्त्रमालिन्याद् रोगाः प्रादुर्भवन्ति । मनोविकारात्कार्यहानिः । द्यूतकारो वाक्शोधनं न कर्तुमर्हति । इन्द्रियादिशोधनेन मनःप्रसन्नता संपद्यते । पानीयं विशोध्य पानीयम् । अतिभोजने ऽहितभोजने वा अजीर्णता जायेत । ततोऽशुद्धिर्नितरां भवित्री । अतो हितमितभोजी ब्रह्मचारी भवेत् । प्राणिनां हिंसनमपि मनोदूषकमतस्तत् कदाऽपि नाचरेत् । संसारस्य वायुजलविशोधनाय शिष्टा होमं विदधते ॥

अद्भिर्गात्राणि शुध्यन्ति,
मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा,
बुद्धिर्ज्ञानेन शुध्यति ॥

मनसा वपुषा वाचा,
वस्त्रेण विभवेन च
वकारैः पञ्चभिर्युक्तो,
नरः प्राप्नोति गौरवम् ॥

कश्चित् पाश्चात्यविज्ञाननिष्णातोऽध्यापिनानेक-

ज्ञानो तपःपरिपूतचेता विक्रमसहस्रीमण्डनभूत
इन्द्रप्रस्थ उवास। सच कदाचिद् विविधवादित्रनि-
हितमङ्गले महामहे महीपत्याऽऽकारितसत्प्रति-
ष्ठितमहाजने महत्या जनतया सम्पादितकोलाहले
राज्ञा समाहूतः। सचैकाकी हालिक इवामनोज्ञवेष-
स्तत्र राजद्वारे प्रवेष्टुमियेष। प्रवेशनावसरे प्रतीहारे-
णानिरुद्धप्रवेशोऽपि तत्रस्थमहाजनैस्तदीयवस्त्रमा-
लिन्याद् वेषाशौच्याच्च तदीयसंसर्गमसहमानैः "कु-
त आगतोऽसि, केन प्रवेशितोऽसि? दूरेऽपसर" इ-
त्यादिरूपेण तिरस्कृतः, तादृशावमाननासंतापता-
पितहृदयश्च ततः स्वयमुत्थाय स्वाऽऽवासमभजत्।
"अहो! पारमार्थिकत्वमजानतो लोकस्य गतानुग-
तिकत्वं! किमिदानीं कर्तव्यमिति स पूर्वं विचार्य, पुन-
रपि कथंचित्तत्रैव गन्तव्यमिति" निरचैषीत्। ततः
कुतश्चिदानीय काश्मीरदेशोद्भवं दुकूलादिकं तेन निजं
वपुः प्रच्छाद्य, मनोहरोपानहौ धारयित्वा, कुङ्कुमशु-
भ्रां यष्टिकामवलम्ब्यैकेन भृत्येन सह चचाल।
चलित्वा द्वारमासाद्य परिचितापरिचितैः सर्वैरेव
वस्त्रादिधारणेन तं महापुरुषं जानद्भिः कृतप्रणामो
महार्घेऽर्हे चासने समुपाविवेश। इतस्ततः समागतै-
स्तदीयाद्भुताकृतिं सादरं पश्यद्भिर्बहु मानितश्च।
यदा भोजनावसरे तस्य कोचिदस्य पार्श्वे शष्कुलीमो-

दकादयः परिवेषितास्तदा स तानुत्थायोत्थाय स्वाङ्ग-रक्षकादीन् प्रत्येकं भोजयितुमारब्धो ऽकथयच्च:- उपवस्त्र ! त्वं भक्ष, शीर्षस्य ! किमर्थं मौनमालम्ब्यते, कुतो न खादसि, उपानद् ! मोकदमाद्धि" । एवं मुहुर्मुहुः कुर्वाणं तं तत्रस्थाः सविस्मयं लक्षयन्तो बभाषिरे-किमिदं क्रियते ! इति । राजाऽऽप्यागत्य तद्वत् पप्रच्छ । सनिर्बन्धं पृच्छद्भ्यश्च तेभ्यः स आदित आरभ्य समस्तमेवोदन्तं वस्त्रादिमूलको ह्येष सम्मान इत्यादिरूपेण कथयामास । ततः स्वप्रबन्धं निन्दन्तः, क्षम्यतां भगवन् ! इत्यादि वदन्तश्च तदीयगुणपारवश्यात्तं बहु मानयामासुः ॥

अतः सिद्धमेतद्यो वस्त्रादिमालिन्येन चरति, स पण्डितोपि बुद्धिमानपि तिरस्क्रियत एव ॥

—:+⁂+:—

## नवमः पाठः ।

—*÷×÷*—

षड्विधं भोजनम् । भक्ष्यभोज्यचूष्यलेह्यचर्व्यपेयभेदात् । भक्ष्यं मोदकादि । भोज्यं सूपादि । चूष्यमाम्रादि फलम् । लेह्यं रसालादि । चर्व्यं चिपिटधान्यादि । पेयं जलादि ॥ भोजनसमयेऽनुचितं जिह्वा-

लौल्यं न कार्यम् । कोलाहलं विहायारहितमनसा तत्करणीयम् । सूपकारविद्यायां नलो राजाऽतिचतुरोऽभूत् । व्यञ्जनमुपव्यञ्जनञ्च कारयितव्यम् । प्रायेण शूद्राः स्त्रियश्च पाचककर्म कुर्वन्ति । आढकी दाली अत्युष्णतां करोति । केचिन्माषदालीं सर्वदा सेवन्ते । मुद्गोद्भवा तु प्रायो रोगिभिरद्यते। कालदेशशक्तिप्रकृतिनियमानुसारेण भोजनीयम् । अधिकभोजनेन बहवो म्रियन्ते, अथ तेनाऽऽयुः क्षीयते, निन्दा च जायते । ओदना बुद्धिवर्द्धकाः सन्ति । शाकाश्च रुचिकराः । रक्तमरीचनिषेवणं न साधु । हरिद्रा जीरकं धान्याकं च यथोचितं मेलनीयम् । वृन्ताकालुकमेथिकादयः शाका विशेषतो न भोक्तव्याः । ग्रासश्च बहुवारं मुखे निष्पिष्य भक्षणीयः। भुक्त्वा धावनं कदापि न कार्यम् ॥

नोच्छिष्टं कस्यचिद्दद्यात्,
नाद्याच्चैव तथान्तरा ।
न चैवात्यशनं कुर्यात्,
नचोच्छिष्टः क्वचिद् व्रजेत् ॥ १ ॥

ब्राह्मे मुहूर्ते उत्तिष्ठेत्,
स्वस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्वर्त्य,
कृतशौचविधिस्ततः ॥ २ ॥

दिनचर्यां निशाचर्यां,
ऋतुचर्यां यथोचितम् ।
आचरन्पुरुषः स्वस्थः,
सदा तिष्ठति नान्यथा ॥ ३ ॥

सर्वेषामेव रोगाणां,
निदानं कुपिता मलाः ।
तत्प्रकोपस्य तु प्रोक्तं,
विविधाऽहितसेवनम् ॥ ४ ॥

न वेगान्धारयेद्धीमान्
जातान् मूत्रपुरीषयोः ।
नोद्गारजृम्भावाद्यादेः,
न वध्याः सर्वथा नैव ॥ ५ ॥

न वेगितोऽन्यकार्यः स्या,-
न्न वेगानीरयेद् बलात् ।
कामशोकभयक्रोधान्,
मनोवेगान् विधारयेत् ॥ ६ ॥

अप्राप्तकाले भुञ्जानः,
शरीरे ह्यलघौ नरः ।
तांस्तान् व्याधीनवाप्नोति,
मरणं वाऽधिगच्छति ॥ ७ ॥

अश्नीयात्तन्मना भूत्वा,
पूर्वन्तु मधुरं रसम् ।

मध्ये ऽम्ललवणौ पश्चात्।
कटुतिक्तकषायकान् ॥ ८ ॥
यच्छक्यं ग्रसितुं ग्रस्यं,
ग्रस्तं परिणमेच्च यत्।
हितं च परिणामे स्या,-
त्तदाद्यं भूतिमिच्छता ॥ ९ ॥
निर्गन्धमव्यक्तरसं,
तृष्णाघ्नं शुचि शीतलम्।
अच्छं लघु च हृद्यं च,
तोयं गुणवदुच्यते ॥ १० ॥
उद्गारशुद्धिरुत्साहो,
वेगोत्सर्गो[1] यथोचितः।
लघुता क्षुत्पिपासा च,
जीर्णाहारस्य लक्षणम् ॥ ११ ॥
बुभुक्षितो न योऽश्नाति,
तस्याहारेन्धनक्षयात्।
मन्दीभवति कायाग्नि-,
र्यथाचाग्निर्निरिन्धनः १२ ॥
आहारनिर्हारविहारयोगाः,
सदैव सद्भिर्विजने विधेयाः ॥ १३ ॥

---

१–पुरीषोत्सर्गादि।

भुक्तस्यादौ जलं पीतं,
कार्श्यमन्दाग्निदोषकृत् ।
मध्ये ऽग्निदीपनं श्रेष्ठ,-
मन्ते स्थौल्यकफप्रदम् ॥ १४ ॥
तृषितस्तु न चाश्नीयात्,
क्षुधितो न पिबेज्जलम् ।
तृषितस्तु भवेद् गुल्मी,
क्षुधितस्तु जलोदरी ॥ १५ ॥

—:o:—

## दशमः पाठः ॥

मस्तकं वरमस्ति । केशानां शिखायाश्च बन्धनं कार्यम् । अस्य ललाटं चमत्कृतम् । कर्णौ च शोभनौ । देवदत्तो भ्रुवौ चालयित्वा नेत्रे निमीलयति । अयं खलु दीर्घनासिकः । कपोलौ चास्य व्रणाङ्कितौ । एतस्य दन्तेषु जिह्वायां च कृष्णताऽस्ति । परमोष्ठौ बिम्बाविव प्रतिभातः । चिबुकन्तु नातिमनोहरम् । ग्रीवायां तालु भवति । यज्ञदत्तः स्कन्धयोरुपरि दण्डं धृत्वा चलति । गुरुणा तस्मै चपेटिका दत्ता । श्वेतकेतुर्हस्ताभ्यां तृणानि न छिनत्ति । अस्याङ्गुलयो न्युब्जीभूताः सन्ति । अङ्गुष्ठनखे रक्तता वर्तते । वक्षःस्थलं

रमणीयं दृश्यते । उदरान्तरेऽन्त्राणि गुप्तानि । तद्गुल्फौ तु दीर्घौ स्तः । तत्पादकण्टकोद्धरणं कुरु । चर्मास्थिमेदोमज्जास्रङ्मांसरुधिरावृतमिदं शरीरम् । जानुभ्यामयं गच्छति । देहे मनःसहितानि एकदशेन्द्रियाणि सन्ति । शरीररूपरथस्याधिष्ठाता जीवश्चेतनः ॥

आत्मानं व्यर्थव्यापारे न नियोजयेत् –

अव्यापारेषु व्यापारं,
यो नरः कर्तुमिच्छति ।
स एव निधनं याति,
कीलोत्पाटीव वानरः ॥

कस्मिंश्चिन्नगरान्तिके केनाऽपि वणिक्पुत्रेण तरुषण्डमध्ये[1] देवतायतनं कर्तुमारब्धम् । तत्र च ये कर्मकराः स्थपत्यादयस्[2]ते मध्याह्नवेलायामाहारार्थं नगरमध्ये गच्छन्ति । अथ कदाचित्तत्रानुषङ्गिकं वानरयूथमितश्चेतश्च परिभ्रमदागतम् । तत्रैकस्य कस्यचिच्छिल्पिनोऽर्धस्फाटितोऽञ्जनवृक्षदारुमयः स्तम्भः खदिरकीलकेन मध्यनिहितेन तिष्ठति । एतस्मिन्नन्तरे ते तरुशिखरप्रासादशृङ्गदारुपर्यन्तेषु यथेच्छया

१ वृक्षमण्डलीमध्ये ।

२ शिल्पिप्रभृतयः ।

क्रीडितुमारब्धाः । एकश्च तेषां प्रत्यासन्नमृत्युश्चाप-ल्यात्तस्मिन्नर्द्धस्फाटितस्तम्भे उपविश्य पाणिभ्यां कीलकं संगृह्य यावदुत्पाटयितुमारेभे तावत्तस्य स्तम्भ-मध्यगतवृषणस्य स्वस्थानाच्चलितकीलकेन यद् वृत्तं तच्छ्लोक एवोक्तम् ॥

( पञ्चतन्त्रतः )

---

## एकादशः पाठः

---

शीर्षण्यमद्य कथं न धृतम्? । इदानीं शाटकाः परिधानीयाः । तवोत्तरीयवस्त्रे किं लग्नम् ? । अङ्गप्रोञ्छनमानय । अङ्गरक्षकं कुत्र तिष्ठति ? । नीशारोऽतीवसुन्दरो विद्यते । तद्दुकूलन्तु विचित्रमेव । कौपीनं कथं नानीतम्?। देवदत्त ! जीर्णवस्त्रं किमर्थं धारयसि ?। आस्तरणं बहु शोभते । अस्योपर्युपधानं रचनीयम् । कम्बलः कुतो गृहीतः ?। महाशय ! तव विपण्यां कौशेयं वस्त्रमागतम् ? । चीनांशुकानि दर्शनीयतराणि। अयमूर्णावस्त्रेण शीतं निवारयति । तन्तुवायो वसनानि वयति, सूचीकारश्च सीव्यति । अधुना यन्त्रेणाप्येतद् द्वयं साध्यते । बहूनि वस्त्राणि पशुरोमजानि भवन्ति । कर्पटं पृथक् कुरु । जव-

निकाऽपि पेशला। उपवस्त्रं दीयताम्। वस्त्रादिषु केषुचिदपि वस्तुषु नातितृष्णा कर्तव्या। यत उक्तम्:–

अति तृष्णा न कर्तव्या,
तृष्णां नैव परित्यजेत्॥
अतितृष्णाभिभूतस्य,
शिखा भवति मस्तके॥

कस्मिंश्चिद्वनोद्देशे कश्चित्पुलिन्दः पापर्द्धिं कर्तुं वनं प्रति प्रस्थितः। अथ तेन प्रसर्पता महानञ्जनपर्वतशिखराकारः क्रोडः समासादितः। तं दृष्ट्वा कर्णान्ताकृनिशितसायकेन समाहतः, तेनापि कोपाविष्टेन चेतसा बालेन्दुद्युतिना दंष्ट्राग्रेण पाटितोदरः पुलिन्दो गतासुः भूतलेऽपतत्। अथ लुब्धकं व्यापाद्य शूकरोऽपि शरप्रहारवेदनया पञ्चत्वं गतः। एतस्मिन्नन्तरे कश्चिदासन्नमृत्युः शृगाल इतस्ततो निराहारतया पीडितः परिभ्रमन् तं प्रदेशमाजगाम। यावत् वराहपुलिन्दौ द्वावपि पश्यति तावत्प्रहृष्टो व्यचिन्तयत्– भोः! सानुकूलो मे विधिः, तेनैतदपि अचिन्तितं भोजनमुपस्थितम्। अथवा साधु इदमुच्यते:–

"अकृतेऽप्युद्यमे पुंसा-,
मन्यजन्मकृतं फलम्।

---

(१) वराहः।

शुभाशुभं समभ्येति,
विधिना संनियोजितम् ॥
अन्यच्चः—यस्मिन् देशे च काले च,
वयसा यादृशेन च ।
कृतं शुभाशुभं कर्म,
तत्तथा तेन भुज्यते ॥

तदहं तथा भक्षयामि यथा बहून्यहानि मे प्राणयात्रा भवति । तत्तावदेवं स्नायुपाशं धनुष्कोटिगतं भक्षयामि । यत उक्तम् :—

शनैः शनैश्च भोक्तव्यं,
स्वयं वित्तमुपार्जितम् ।
रसायनमिव प्राज्ञै-,
र्हेलया न कदाचन ॥

इत्येवं मनसा निश्चित्य चापचटितकोटिं मुखमध्ये प्रक्षिप्य स्नायुं भक्षितुं प्रवृत्तः । ततश्च त्रुटिते पाशे तालुदेशं विदार्य चापकोटिर्मस्तकमध्येन निष्क्रान्ता । सोऽपि तद्वेदनया तत्क्षणान्मृतोऽतः पूर्वं सुष्ठूक्तम् ॥ (पञ्चतन्त्रतः)

—o—

## द्वादशः पाठः ।

—:o:—

श्रुतिः स्मृतिः सदाचारः,
स्वस्य च प्रियमात्मनः ।

एतच्चतुर्विधं प्राहुः,
साक्षाद्धर्मस्य लक्षणम् ॥ १ ॥
श्रुतिस्तु वेदो विज्ञेयो,
धर्मशास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये,
ताभ्यां धर्मोहि निर्बभौ ॥ २ ॥
धृतिः क्षमा दमोऽस्तेयं,
शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो,
दशकं धर्मलक्षणम् ॥ ३ ॥
स्वाध्यायेन व्रतैर्होमै-,
स्त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च,
ब्राह्मीयं क्रियते तनुः ॥ ४ ॥
जन्मना जायते शूद्रः,
संस्काराद् द्विज उच्यते ।
वेदाभ्यासाद् भवेद् विप्रो,
ब्रह्म जानाति ब्राह्मणः ॥ ५ ॥
अध्यापनमध्ययनं,
यजनं याजनं तथा ।
दानं प्रतिग्रहश्चैव,
ब्राह्मणानामकल्पयत् ॥ ६ ॥

प्रजानां रक्षणं दान-,
मिज्याध्ययनमेव च ।
विषयेष्वप्रसक्तिश्च,
क्षत्रियस्य समासतः ॥ ७ ॥

पशूनां रक्षणं दान-,
मिज्याध्ययनमेवच ।
वणिक्पथं कुसीदं च,
वैश्यस्य कृषिमेव च ॥ ८ ॥

एकमेव तु शूद्रस्य,
प्रभुः कर्म समादिशत् ।
एतेषामेव वर्णानां,
शुश्रूषामनसूयया ॥ ९ ॥

श्रोत्रं त्वक् चक्षुषी जिह्वा,
नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं,
वाक् चैव दशमी स्मृता ॥ १० ॥

एकादशं मनो ज्ञेयं,
स्वगुणेनोभयात्मकम् ।
यस्मिन् जिते जितावेतौ,
भवतः पञ्चकौ गणौ ॥ ११ ॥

इन्द्रियाणां प्रसङ्गेन,
दोषमृच्छत्यसंशयम् ।

संनियम्य तु तान्येव,
ततः सिद्धिं नियच्छति ॥ १२ ॥

इन्द्रियाणां विचरतां,
विषयेष्वपहारिषु ।
संयमे यत्नमातिष्ठेद्,
विद्वान् यन्तेव वाजिनाम् ॥ १३ ॥

वेदास्त्यागश्च यज्ञाश्च,
नियमाश्च तपांसि च ।
न विप्रभावदुष्टस्य,
सिद्धिं गच्छन्ति कर्हिचित् ॥ १४ ॥

वशे कृत्वेन्द्रियग्रामं,
संयम्य च मनस्तथा ।
सर्वान् संसाधयेदर्था-
नक्षिण्वन् योगतस्तनुम् ॥ १५ ॥

यमान् सेवेत सततं,
न नियमान् केवलान् बुधः ।
यमान् पतत्यकुर्वाणो,
नियमान् केवलान् भजन् ॥ १६ ॥

यस्य वाङ्मनसी शुद्धे,
सम्यग्गुप्ते च सर्वदा,
स वै सर्वमवाप्नोति,
वेदान्तोपगतं फलम् ॥ १७ ॥

अभिवादनशीलस्य,
    नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते,
    आयुर्विद्या यशो बलम् ॥ १८ ॥
न हायनैर्न पलितै-,
    र्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं,
    योऽनूचानः स नो महान् ॥ १९ ॥
यथा काष्ठमयो हस्ती,
    यथा चर्ममयो मृगः ।
यश्च विप्रोनधीयान-,
    स्त्रयस्ते नाम बिभ्रति ॥ २० ॥
योऽनधीत्य द्विजो वेद-,
    मन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्व-,
    माशु गच्छति सान्वयः ॥ २१ ॥

—:*+*:—

## त्रयोदशः पाठः ।

—:*×:*:×*:—

आचार्यहितमाचरणीयम् । तदाज्ञां विना पदमेक-

मपि न चलनीयम् । आचार्येण च धार्मिकेण भवितव्यम् । तदीयान्यनवद्यान्येव कर्माणि सेवितव्यानि, नो इतराणि । तत्कुचेष्टितानि नानुकुर्वीत किन्तु सुचेष्टितानि । तत्कृतदण्डनेऽपि ग्लानिं नेयात् । विद्यां समाप्योपायनं गुरुदक्षिणारूपं यथाशक्ति दानीयम् । अन्यथा तदृणाक्रान्तो भवेत् । सर्वोऽपि स्वोपकर्तारं प्रत्युपकरोति । गुरुसन्निधौ नीचमेवास्यासनं स्यात् । तदपेक्षया हीनान्नवस्त्रवेषश्च ब्रह्मचर्ये । प्रसन्नो गुरुर्गूढमपि तत्त्वं स्पष्टीकरोति । भाविसुखस्य मूलकारणं स एव । अतस्तत्प्रसन्नता संपादनीया । को वा गुरुर्योऽहि हितोपदेष्टा ॥

कदाचिद्रघुः सर्वस्वदक्षिणं विश्वजिन्नामकं यज्ञमाजह्रे । यज्ञान्ते च गुरुकुलान्निःसृतः कौत्सो रघुं प्राप । तस्यैवं कथा रघुवंशस्य पञ्चमे सर्गे वर्तते :—

तमध्वरे विश्वजिति क्षितीशं,
निःशेषविश्राणितकोषजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी,
कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ १ ॥

स मृण्मये वीतहिरण्मयत्वात्,
पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः,
प्रत्युज्जगामातिथिमातिथेयः ॥ २ ॥

तमर्चयित्वा विधिवद् विधिज्ञः,
तपोधनं मानधनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात्,
कृताञ्जलिः कृत्यविदित्युवाच ॥ ३ ॥

अप्यग्रणीर्मन्त्रकृताम्[1]ृषीणां,
कुशाग्रबुद्धे ! कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं,
लोकेन चैतन्यमिवोष्णरश्मेः ॥ ४ ॥

कायेन वाचा मनसाऽपि शश्वत्,
यत्सम्भृतं वासवधैर्यलोपि ।
आपाद्यते न व्ययमन्तरायैः,
कच्चिन्महर्षे स्त्रिविधं तपस्तत् ॥ ५ ॥

आधारबन्धप्रमुखैः प्रयत्नैः,
सम्वर्धितानां सुतनिर्विशेषम् ।

---

१-अत्रेत्थं तत्त्वमवधेयम् । नात्र-"मन्त्रान्कुर्वन्ति सृजन्तीति मन्त्रकृतस्तेषां मन्त्रकृताम्" इति व्युत्पत्तिः साधीयसी । सत्येवं तु अपौरुषेयाणां वेदमन्त्राणां पौरुषेयत्वं स्यात। सति च तस्मिन्नना-प्तवाक्यवद्धेयता स्यात् । अतः 'ऋषीणाम्' इत्यस्य 'मन्त्रकृताम्' इति विशेषणं वेदस्यापौरुषेयत्वेऽविरुद्धं यथा तथा समाधीयते । तच्च यथा-'मन्त्रान् कुर्वन्ति प्रयोगविधिना साध्यान् कुर्वन्ति, अभी-ष्टवस्तुलाभाय प्रयुञ्जत इति वा मन्त्रकृतः तेषां मन्त्रकृताम्, इति । एवं च सर्वं सुविचाररमणीयम् । (ला० वे० सं० गोविन्दशास्त्री)

कच्चिन्न वाय्वादिरुपप्लवो वः,
श्रमच्छिदामाश्रमपादपानाम् ॥ ६ ॥
क्रियानिमित्तेष्वपि वत्सलत्वा,-
दभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला,
कच्चिन्मृगीणामनघा प्रसूतिः ॥ ७ ॥
निर्वर्त्यते यैर्नियमाभिषेको,
येभ्यो निवापाञ्जलयः पितॄणाम् ।
तान्युञ्छषष्ठाङ्कितसैकतानि,
शिवानि वस्तीर्थजलानि कच्चित् ॥ ८ ॥
नीवारपाकादि कडङ्गरीयै,-
रामृश्यते जानपदैर्न कच्चित् ? ।
कालोपपन्नातिथिकल्प्यभागं,
वन्यं शरीरस्थितिसाधनं वः ॥ ९ ॥
अपि प्रसन्नेन महर्षिणा त्वं,
सम्यग्विनीयानुमतो गृहाय ।
कालो ह्ययं संक्रमितुं द्वितीयं,
सर्वोपकारक्षममाश्रमं ते ॥ १० ॥
तवार्हतो नाभिगमेन तृप्तं,
मनो नियोगक्रिययोत्सुकं मे ।
अप्याज्ञया शासितुरात्मना वा,
प्राप्तोऽसि सम्भावयितुं वनान्माम् ॥ ११ ॥

इत्यर्घ्यपात्रानुमितव्ययस्य,
रघोरुदारामपि गां निशम्य ।
स्वार्थोपपत्तिं प्रति दुर्बलाशः,
तमित्यवोचद् वरतन्तुशिष्यः ॥ १२ ॥
सर्वत्र नो वार्तमवेहि राजन्,
नाथे कुतस्त्वय्यशुभं प्रजानाम् ।
सूर्ये तपत्यावरणाय दृष्टेः,
कल्पेत लोकस्य कथं तमिस्रा ॥ १३ ॥
भक्तिः प्रतीक्ष्येषु कुलोचिता ते,
पूर्वान् महाभाग ! तयाऽतिशेषे ।
व्यतीतकालस्त्वहमभ्युपेत-,
स्त्वामर्थिभावादिति मे विषादः ॥ १४ ॥
शरीरमात्रेण नरेन्द्र ! तिष्ठ-
न्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः,
स्तम्बेन नीवार इवावशिष्टः ॥ १५ ॥
स्थाने भवानेकनराधिपः स-,
न्नकिंचनत्वं मखजं व्यनक्ति ।
पर्यायपीतस्य सुरैर्हिमांशोः,
कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥ १६ ॥
तदन्यतस्तावदनन्यकार्यो,
गुर्वर्थमाहर्तुमहं यतिष्ये ।

स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं,
शरद्घनं नार्दति चातकोऽपि ॥ १७ ॥

एतावदुक्त्वा प्रतियातुकामं,
शिष्यं महर्षेर्नृपतिर्निषिध्य ।
किं वस्तु विद्वन् ! गुरवे प्रदेयं,
त्वया कियद्वेति तमन्वयुंक्त ॥ १८ ॥

ततो यथावद् विहिताध्वराय,
तस्मै स्मयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी,
विचक्षणः प्रस्तुतमाचचक्षे ॥ १९ ॥

समाप्तविद्येन मया महर्षि-,
र्विज्ञापितोऽभूद् गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां,
तां भक्तिमेवागणयत् पुरस्तात् ॥ २० ॥

निर्बन्धसंजातरुषाऽर्थकार्श्य-,
मचिन्तयित्वा गुरुणाऽहमुक्तः ।
वित्तस्य विद्यापरिसंख्यया मे,
कोटीश्चतस्रो दश चाहरेति ॥ २१ ॥

सोऽहं सपर्याविधिभाजनेन,
मत्वा भवन्तं प्रभुशब्दशेषम् ।
अभ्युत्सहे संप्रति नोपरोद्धु,-
मल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ॥ २२ ॥

इत्थं द्विजेन द्विजराजकान्ति,-
रावेदितो वेदविदां वरेण ।
एनोनिवृत्तेन्द्रियवृत्तिरेनं,
जगाद भूयो जगदेकनाथः ॥ २३ ॥

गुर्वर्थमर्थी श्रुतपारदृश्वा,
रघोः सकाशादनवाप्य कामम् ।
गतो वदान्यान्तरमित्ययं मे,
माभूत् परीवादनवावतारः ॥ २४ ॥

स त्वं प्रशस्ते महिते मदीये,
वसंश्चतुर्थोऽग्निरिवाग्न्यगारे ।
द्वित्राण्यहान्यर्हसि सोढुमर्हन्, !
यावद्यते साधयितुं त्वदर्थम् ॥ २५ ॥

इत्युक्त्वा सत्यसंगरो रघुः कथमपि तस्मै ततोऽप्यधिकं धनं ददद्भिनन्द्यसत्त्वोऽभूत् ।

एवमेव गुरुचरणरजःकर्णधारीकुर्वाणा विविधप्रकारैः सद्गुरून् प्रसादितवन्तः शिष्यास्तदीयैहिकपारलौकिकसुखसंपादनाय दृढपरिकरा गुरवश्च बहवो बभूवुः ।

—०—

## चतुर्दशः पाठः।

---

### प्रश्नोत्तराणि।

शिष्यो गुरुं पृष्टवान् महानुभाव ! कतिपयविषयानहं बोद्धुमभिलषामि। अतः सदुत्तरदानेनानुग्राह्योऽयं दासः। गुरुरुवाच—बाढम्, कथय वत्स ! यत्ते प्रष्टव्यम्।

प्रश्नः- जगति कः सेवनीयः ?

उत्तरम्- परमात्मा, मातापित्रादयश्च।

प्रश्नः-निराकारः परमात्मा कथं सेव्यः ?

उत्तरम् -वेदोक्तसन्ध्यादिधर्म्यकर्मानुष्ठानेन।

प्रश्नः-कोऽसौ धर्मः ?

उत्तरम्-दयादाक्षिण्यादिरूपो वेदोक्तः, धृतिक्षमाद्यात्मको मन्वाद्युक्तश्च।

---

(१)-धृतिः क्षमा दमोऽस्तेयं, शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो, दशकं धर्मलक्षणम्॥ ( मनुः )

प्र०-कस्याधिक्यं वरम् ?

उ०-धर्मस्य ज्ञानस्य च, अन्यस्याधिक्यं सर्वदा दुःखावहम् । ज्ञानेन धर्मो भवति, सुखं धर्मेण जायते ।

प्र०-किमुपार्जनीयम् ?

उ०-सौजन्यम् ।

प्र०-किं हेयम् ?

उ०-मूर्खता, दुष्टजनसमागमः, कामक्रोधादयश्चाटुकारितादयश्च ।

प्र०-को मूर्खः ?

उ०-यः स्वोन्नतिं परोन्नतिं च न करोति । यश्च विषयासक्तो भवति ।

प्र०-उन्नतिः कथं जायते ?

उ०-पौरुषेण ।

प्र०-किं पौरुषम् ?

उ०-सदाचारपूर्वकं विद्याद्यर्जने श्रम एव ।

प्र०-के सुखदुःखे ?

उ०-सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् ।

प्र०—परः कः ?

उ०—इन्द्रियाण्येव । इन्द्रियवश्यतैव दुःखम्, तान्येव स्वाधीनीकुर्वन् सुखभाग् भवति ।

प्र०—कः शूरः ?

उ०—इन्द्रियनिरोधनशीलः ।

प्र०—तेन विना किं भवति ?

उ०—महति दुःखे निपतनम् ।

प्र०—का हानिः ?

उ०—वृथा कालक्षेपः ।

प्र०—किं सुखम् ?

उ०—अनुकूलवेदनीयम् ।

प्र०—को मोहः ?

उ०—संसारे गाढोऽनुरागः ।

प्र०—कः शोकः ?

उ०—दुःखावस्थायां पूर्वसुखस्मरणम् ।

प्र०—क आत्मीयः ?

उ०—यथार्थवादी ।

प्र०-किं भूषणं जनानाम् ?

उ०-उत्तमा विद्या ।

प्र०-कः सर्वेषां बलिष्ठः ?

उ०-यो धर्मपरायणः ।

प्र०-कः सर्वत्र उन्नतः ?

उ०-गुणवान् भूत्वा यो नम्रः ।

प्र०-का अविद्या ?

उ०-अन्यथाज्ञानम् ।

प्र०-कः सुहृत् ?

उ०-परिश्रमः ।



प्र०-किं मुहुश्चिन्त्यम् ?

उ०-संसारानित्यत्वं मृत्युश्च ।

प्र०-कुत्र विधेयो यत्नः ?

उ०-विद्याभ्यासे,दानादौ,स्ववर्णाश्रमोक्तकृत्ये च ।

ततस्तूष्णींभूते शिष्ये गुरुरुक्तवान्—वत्स ! तव प्रश्नैरहं भृशं सन्तुष्टोस्मि, एवं पुनरहमुपदिशामि, यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि नो इतराणीति ॥

॥ इति शम् ॥

सद्धर्मप्रचारकस्थ-मुद्रित-मुद्र्यमाण विक्रेयपुस्तकानां
विज्ञप्तिः ॥

# अष्टाध्यायीवृत्तिः ।

श्रीपण्डितगङ्गादत्तशास्त्रिभिः
प्रणीता ॥

वृत्तिरियमतीवनैपुण्येन, पाणिनीयाष्टकमविविक्षूणां सुकु-
मारमतीनां विद्यार्थिनां सौकर्यहेतवे विरचिता ।

प्रख्यातवैदुष्य-श्रीग्रन्थकर्त्तुर्नामैवैतदुपादेयत्वे
पर्याप्तं प्रमाणं । तदलमधिकप्रशस्तप्रशंस-
नया । अस्याश्चतुर्थाध्यायपर्यन्तः प्र-
थमो भागो मुद्रितो विक्रेयो
विद्यते । द्वितीयश्चाचि-
रादेव मुद्रयितुमा-
रप्स्यत इति ॥



—:※:—

गुरुकुलग्रन्थमालायास्तृतीयभागोऽपि
मुद्रयितुमारब्धो; न चिरादेव समाप्तिं यास्यति ॥

गुरुकुलग्रन्थमालायाश्चतुर्थभागस्य मूल्यं ।॥)